# शाब्दबोधः

डा. टि. आर्यादेवी

विविच्य ज्ञातुं शक्तिः विशेषबुद्धिः। विशेषबुद्धिरेव मनुष्याणाम् अन्येभ्यो जन्तुभ्यो भेदिका। अतिप्राचीनकाल एव भारतीयाः एतादृश्याः बुद्धेः प्राधान्यं ज्ञातवन्तः। विशिष्टबुद्धिमन्तः कविकण्वादिशब्दैः स्तूयन्ते ऋग्वेदादिषु।

ज्ञानस्यार्जने निरतास्ते अस्माकं पूर्विकाः ज्ञानमपि स्वचिन्तायाः विषयं कृत्वा ज्ञानं कथं जायते, तस्य स्वरूपं किं, कतिविधं ज्ञानं भवति, ज्ञानस्य कारणानि कानि इत्यादिकं बहुधा चिन्तयित्वा ज्ञानशास्त्रस्य प्रारम्भं कृतवन्तः। तदनुसारेण अनेकानि दर्शनानि सञ्जातानि।

विविधेषु दर्शनेषु केचन शरीरादिभिन्नस्य आत्मनः अस्तित्वं स्वीकुर्वन्ति; अपरे तु न। तथापि सर्वेषामपि चिन्तापद्धतौ ज्ञानस्य मुख्यविषयत्वमस्त्येव। यद्यपि ज्ञानस्यास्तित्वे नास्ति विवादः तथापि तस्य स्वरूपादिकं प्रति वर्तत एव विवादः।

**नैयायिकमतम्**

न्यायदर्शनानुसारेण ज्ञानमात्मनो विशेषगुणः। आत्मा च शरीरेन्द्रियादिभिन्नः नित्यो विभुश्च। अनात्मनि शरीरादौ आत्मभावनरूपमिथ्याज्ञानमेव संसारकारणम्। आत्मा प्रतिशरीरं भिन्नः। प्रतिशरीरं मनो वर्तते, तच्चाणुरूपं नित्यञ्च। आत्मनः मनसश्च संयोगः ज्ञानस्यासमवायिकारणम्; आत्मा च समवायिकारणम्। आत्मनि समवायसम्बन्धेन ज्ञानं जायते, अत एव तस्य समवायिकारणत्वम्। ज्ञानस्य निमित्तकारणानि च तत्तज्ज्ञानविशेषे भिन्नानि भवन्ति।

ज्ञानविभागः

स्मृतिरनुभवश्चेति ज्ञानस्य प्रथमं तावत् द्वैविध्यम्। अनुभवश्च यथार्थोऽयथार्थ इति द्विविधः। तत्र यथार्थानुभवः प्रमेत्युच्यते। प्रमा च प्रत्यक्षमनुमितिः उपमितिः शाब्द इति चतुर्विधा भवति। प्रमायाः करणं प्रमाणमित्युच्यते। प्रमायाः चतुर्विधत्वात् प्रमाणस्यापि चातुर्विध्यम्। प्रत्यक्षानुमानोपमानशब्दाः चत्वारि प्रमाणानि. तत्रेन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षमित्युच्यते। अनुमानजन्यं ज्ञानमनुमितिरिति, उपमानजन्यं ज्ञानमुपमितिरिति चोच्यते। शब्दात् जायमानो बोधः शाब्दबोधः।

**शाब्दबोधः**

वाक्यार्थबोधः, अन्वयबोधः इत्यादीन्यपि शाब्दबोधसमानार्थकाणि। शाब्दबोधाख्यस्य प्रमितेः करणं शब्द इति प्राचीनाः, शब्दज्ञानमिति नवीनाश्च वदन्ति। आप्तवाक्यं शब्द इत्युच्यते। आप्तस्तु यथार्थवक्ता। अतः यथार्थवक्त्रुक्तशब्दस्य शब्दज्ञानस्य वा शब्दप्रमाणत्वम्।

लोके तावत् सर्वेऽपि वक्तारश्शब्दान् प्रयुञ्जन्ति, श्रोतारः वक्तृभिः उक्तानर्थान् सम्यक् जानन्ति च। यद्यपि चतुर्षु प्रमाणेषु शब्दस्यान्तिमत्वं दत्तं तथापि तद् शब्दस्यामुख्यतया न, परन्तु तस्य महाविषयत्वादेव। तथा च सूचीकटाहन्यायेनैव शब्दस्यान्तिमस्थानत्वं दत्तमिति ज्ञातुं शक्यते। अन्यानि प्रमाणान्यपेक्ष्य शब्दाख्यस्य प्रमाणस्यैव मानुषजीविते प्रमुखतया प्रयोगो दृश्यते। अत एवाचार्यदण्डिना शब्दो ज्योतिरिति पदेन व्याजह्रे। यदि शब्दाह्वयं ज्योतिर्नासीत्तर्हि भुवनत्रयं कृत्स्नं अन्धं तमः जायेत इति हि तस्योक्तिः। तादृशस्य शब्दाख्यस्य प्रमाणस्य तज्जन्यस्य शाब्दबोधस्य च विशिष्टा चिन्ता न्यायदर्शने नव्यन्यायकालादारभ्यानन्तरमेव प्रधानपदवीमगच्छत्।

वाक्यं श्रुत्वा अर्थबोधो भवतीत्यत्र यद्यपि बहूनां समानाभिप्रायः, तथापि पदानां, पदार्थानाम्,

अन्यस्य वा वाक्यार्थबोधे कारणत्वमित्यत्र दार्शनिका विवदन्ते। वाक्ये श्रूयमाणे सति श्रूयमाणैः पदैः अभिव्यज्यमानः स्फोटः वाक्यार्थं जनयतीति वैयाकरणानां मतम्। काष्ठानि ज्वालां कृत्वा पाके सहायकानि भवन्ति। तत्र काष्ठानां ज्वालारचनायामेव सामर्थ्यं, पाके तु ज्वाला कारणम्। तथैव पदानि पदार्थबोधं जनयति, पदार्थाश्च वाक्यार्थबोधं जनयन्ति। पदार्थबोध्यत्वात् वाक्यार्थो लक्ष्यः। पदानां वाक्यार्थबोधे कारणत्वन्नास्ति। पदार्थस्यैव वाक्यार्थबोधे कारणत्वमिति अभिहितान्वयवादिनो भाट्टमीमांसकाः। बालः व्यवहारेण पदानामितरान्विते शक्तिमवधारयति, अतः वाक्ये श्रूयमाणे श्रवणविषयाणि अन्वितशक्तानि पदानि वाक्यार्थबोधं जनयन्ति। यथा शिबिकावाहकानां सर्वेषां वहनक्रियायां कारणत्वं, तथैव पदानां सर्वेषां वाक्यार्थबोधे कारणत्वमिति अन्विताभिधानवादिनः प्राभाकरमीमांसकाः। नैयायिकास्तु अन्वयः आकाङ्क्षालभ्यः, न पदशक्यः, न वा पदार्थलक्ष्यः। वृत्या पदजन्यपदार्थोपस्थितिद्वारा आकाङ्क्षादिसहकारेण पदानां वाक्यार्थहेतुता इति वदन्ति। एते भवन्ति शाब्दबोधमधिकृत्य प्रधानाः सिद्धान्ताः। शाब्दतरङ्गिण्यां वि. सुब्रह्मण्य शास्त्रिणः एतान् सिद्धान्तान् प्रस्तुतवन्तः। तदनुसारेण प्रस्तूयते।

**अभिहितान्वयवादः**

भाट्टमतानुयायिनः अस्य वादस्य पुरस्कर्तारः। पदानि स्वं स्वमर्थमभिधाय निवृत्तव्यापाराणि, अथेदानीं पदार्था अवगतास्सन्तः वाक्यार्थमवगमयन्ति' इति शाबरभाष्यं प्रमाणयन्तः एते एवमुच्यन्ते- पदसमूहानां श्रवणानन्तरमपि पदार्थज्ञानाभावे वाक्यार्थो नावगम्यते, पदार्थोपस्थित्यनन्तरन्तु वाक्यार्थोऽवगम्यते च। अतोऽन्वयव्यतिरेकाभ्यां वाक्यार्थबोधं प्रति पदार्थज्ञानस्य कारणत्वं सिद्ध्यति। अपि च पदार्थानामेव परस्परान्वयार्हत्वम्। विनापि पदं पदार्थमात्रात् वाक्यार्थबुद्धिरुदेति। कवयः स्वयमुत्प्रेक्षितमर्थं काव्ये निबध्नन्ति। वाक्यरचनायां वाक्यार्थज्ञानं हेतुः। काव्यस्य हेतुः वाक्यार्थज्ञानं कवेः न पदाज्जातम्। चिन्तावशेनोपस्थिता एवार्थाः परस्परमन्वयमवगमयन्ति। एवं येन पुरुषेण अज्ञाताश्रयं श्वैत्यं प्रतिपन्नं हेषारवेण अज्ञातरूपोऽश्वोऽनुमितः, खुरनिक्षेपशब्देन अज्ञातकर्तृकं धावनञ्चानुमितं तस्य पुरुषस्य श्वेतोऽश्वो धावतीति वाक्यार्थबुद्धिरुदेति। न च तत्र पदं श्रूयते। तस्मात्पदार्था एव वाक्यार्थमवगमयन्ति, न पदानि। दीर्घतमेषु वाक्येषु पुनः पदानुसन्धानमशक्यमेव।

पाकपराण्यपि काष्ठानि न साक्षात् पाकसमर्थानि। अपि तु ज्वलन एव। तद्वत् पदानि अर्थानभिदधाति, अर्थाश्च वाक्यार्थमवगमयति।

पदजन्यं पदार्थज्ञानञ्च न तावत् स्मृतिरूपम्। स्मृतिरूपत्वे सम्बन्धसापेक्षत्वम्। एकसम्बन्धिज्ञानमेवापरसम्बन्धिस्मारकम्। पदस्य पदार्थेन सह संयोगादिरूपसम्बन्धो नास्ति। अतः पदजन्यपदार्थज्ञानस्य स्मृतिरूपत्वस्वीकारो न युक्तः। अज्ञातविषयत्वाभावात् अनुभवत्वमपि न युज्यते। वार्तिकादौ यद्यपि पदजन्यपदार्थज्ञानस्य स्मरणव्यवहारो दृश्यते, तथापि स औपचारिकः, गृहीतग्राहित्वेन स्मरणाविशिष्टत्वात्। पदजनिताभिधाननामकविलक्षणज्ञानविषयीभूता पदार्था अभिहिता इत्युच्यन्ते। पदजन्यञ्च पदार्थस्वरूपमात्रविषयकं ज्ञानं निर्विकल्पकं भवति। एवमभिहिताः पदार्थाः स्वसम्बन्धिनीमन्वितावस्थां लक्षयन्ति।

यथा गङ्गायां घोष इत्यत्र गङ्गापदस्मृतप्रवाहेण तीरं स्मार्यते इत्यतः तीरं लक्ष्यमित्युच्यते, तथैव पदजन्याभिधानविषयेण पदार्थेन अन्वयोऽनुभूयत इत्यतः अन्वयरूपो वाक्यार्थः लक्ष्य इत्युच्यते। पदबोध्यः शक्यः, पदार्थबोध्यो लक्ष्य इति तान्त्रिकमर्यादा। परन्तु कश्चन विशेषो वर्तते, वाक्यार्थो लाक्षणिकोऽपि अनुभवविषयः। लाक्षणिकं तीरन्तु स्मृतिविषयम्।

अभिहितेन पदार्थेन करणेन अन्वयः पदार्थसंसर्गरूपान्वयधीः इति अभिहितान्वयशब्दस्यार्थः।

**अन्विताभिधानवादः**

प्राभाकरमीमांसकाः एनं वादं पुरस्कुर्वन्ति। तेषामयमाशयः-व्युत्पत्तिनिरपेक्षात् शब्दादर्थो नावगम्यते। व्युत्पत्तिश्च व्यवहाराद्भवति। वक्तारः संसृष्टार्थविवक्षया वाक्यं प्रयुञ्जते। श्रोतारः संसृष्टार्थमेव बुध्यन्ते। यथा शिबिकायाः वाहकाः सर्वेऽपि वहनक्रियाकर्तारः, यथा वा त्रयोऽपि ग्रावाणः डखां बिभ्रति तद्वत् वाक्यघटकानि सर्वाणि पदानि वाक्यार्थबोधे कारणानि। पदानामर्थान्तरान्वितस्वार्थे शक्तिः। व्युत्पत्तिग्रहोत्पत्तिप्रकारश्चेत्थम्-यदा उत्तमवृद्धः गामानयेति वाक्यं प्रयुङ्क्ते, तदा मध्यमवृद्धः गवानयने प्रवर्तते। तद् दृष्ट्वा पार्श्वस्थो बालो मध्यमवृद्धस्य प्रवृत्तिः ज्ञानजन्येति, प्रवृत्तिजनकं ज्ञानञ्च गामानयेति वाक्यजन्यमिति च विजानाति। एवमसकृत् प्रयोगेण गामानयेति वाक्यस्य गोकर्मकानयने व्युत्पत्तिर्जायते। ततः कदाचिदश्वमानयेति प्रयुक्ते अश्वानयनरूपां प्रवृत्तिं दृष्ट्वा अश्वपदावापे तदर्थस्यान्वयात् गोपदोद्वापे तदर्थस्यान्वयात् अश्वपदस्य अर्थान्तरान्वितहयरूपार्थे, गोपदस्य अर्थान्तरान्वितसास्नादिमत्यर्थे च प्रत्येकं शक्तिं गृह्णाति। इयमेव इतरान्वितार्थानुभवजनकत्वरूपा पदानामानुभाविकी शक्तिः। एवञ्च पदानामन्विते शक्तिरिति सिद्ध्यति।

अन्वयं विना अन्वितबोधनासम्भवात् अन्विताभिधायिना पदेन अन्वयो बोध्यते। पदानामन्वये शक्तिस्वीकार आवश्यकः। अन्यथा अन्वयविशेषजिज्ञासाया अनुपपत्तिः। वाक्ये श्रूयमाणे पदार्थयोः संसर्गरूपस्यान्वयस्य जिज्ञासा वर्तत इति निर्विवादम्। एषा च अन्वयविशेषजिज्ञासा। सामान्यज्ञानं विना विशेषज्ञानं न घटते। अतः शक्तिग्रहसमये सामान्यतया संसर्गग्राह्ये जायत इत्यङ्गीकरणीयम्। परन्तु अन्वये पदानां पृथक् शक्तिः न स्वीक्रियते। यथा जातौ शक्तिः स्वीक्रियते, न तु व्यक्तौ, परन्तु जातिस्वभावात् व्यक्त्या सह जातिर्भासते। जातिभानप्रयोजकजातिज्ञानादिकमेव व्यक्तिं भासयति, अतः जातौ भासमानायां व्यक्तिरपि भासते, तथा अन्वितबोधनसमये अन्वयोऽपि बुध्यते, अतः अन्वयः अन्वितार्थनिमित्तकः। एष एवार्थः पदानि स्वस्वमर्थमभिधाय निवृत्तव्यापाराणि। अथेदानीं पदार्थाः अवगताः सन्तः वाक्यार्थशब्दस्य अन्वय इत्यर्थे तात्पर्यम्। वाक्यतात्पर्यविषयः वाक्यार्थः। अर्थशब्देनान्वितार्थो विवक्षितः। तथा च पदानि *अन्वितमर्थमभिधाय* निवृत्तव्यापाराणि। नान्वयं पृथगभिदधाति। अथेदानीं प्रतिपन्नाः पदार्थाः अन्वितार्थाः वाक्यार्थमन्वयमवगमयन्ति इत्येवार्थः।

एकैकपदश्रवणानन्तरमनन्विततत्तदर्थोपस्थितौ सत्याम् एकस्मृत्यारूढेभ्यः पदेभ्यः आकाङ्क्षितयोग्यसन्निहितार्थान्तरान्वितप्रतीतिः जायते।

**आकाङ्क्षावादः**

नैयायिकैः आकाङ्क्षावादः पुरस्क्रियते। तेषां मतमित्थम्-पदानि आकाङ्क्षादिसहकारेण पदार्थस्मृतिद्वारा वाक्यार्थमवगमयन्ति। शक्तिग्रहं विना पदार्थज्ञानं न जायते। अतः वाक्यार्थबोधे शक्तिज्ञानस्य सहकारिकारणत्वम्। शक्तिग्रहणार्थम् अनेके उपायास्सन्ति, तत्र प्रथमगणनीयत्वं व्यवहारस्यैव। प्राथमिकशक्तिग्रहः व्यवहारादेव जायते। व्युत्पित्सु बालः उत्तमवृद्धस्य वाक्यं श्रुत्वा मध्यमवृद्धस्य प्रवृत्तिं दृष्ट्वा मध्यमवृद्धस्य प्रवृत्तिः संसृष्टार्थज्ञानादेवेति अनुमीयते। ततः आवापोद्वापाभ्यां गवादिपदानां गवादिरूपार्थे शक्तिं गृह्णाति। तथा च व्यवहारेण पदानां संसृष्टार्थज्ञाने हेतुता वर्तत इति सिद्ध्यति। अतः पदानां – वाक्यार्थधीजनकत्वं वर्तते। वृत्या पदजन्यपदार्थस्मरणं व्यापारः। पदानां वाक्यार्थबोधजनकत्वे पदार्थस्मरणरूपव्यापारस्य सत्वात् करणत्वं सिध्यति। व्यापारवत्कारणं हि करणम्।

पदानां जातिविशिष्टव्यक्तौ शक्तिः। गौरानीयतामित्यादौ व्यक्तिभानमावश्यकम्। व्यक्तौ शक्तिं विना व्यक्तेः भानं न स्यात्।

पदज्ञानं विना यद्यपि श्वेतोऽश्वो धावतीति संसर्गधीरुदेति तथापि सा न शाब्दबोधात्मिका।

पदार्थसंसर्गज्ञानमात्रस्य शाब्दबुद्धित्वन्नास्ति। पदजन्यस्य पदार्थसंसर्गज्ञानस्यैव शाब्दत्वम्।

वाक्यार्थो लक्ष्य इति कथनमसमञ्जसम्। वृत्या पदजन्यपदार्थोपस्थितिः शाब्दबोधे कारणम्। वृत्तिर्नाम पदपदार्थयोः सम्बन्धः। स च शक्तिलक्षणाभेदेन द्विविधः। एवञ्च लक्षणापि पदवृत्तिरेव। अतः पदार्थानां वाक्यार्थबोधहेतुत्वमिति पक्षे लक्षणा न संभवति। अतः पदान्येव पदार्थस्मृतिद्वारा वाक्यार्थबोधं जनयन्ति इति स्वीकर्तव्यम्। अतः पदानां शाब्दप्रमाकरणत्वञ्च सिद्ध्यति।

परन्तु पदानामन्विते न शक्तिः। प्रथमतः इतरान्विते शक्तिग्रहः, तथापि पश्चाद् अन्विते शक्तेस्त्यागः। सर्वैरपि अन्वयविशेषबोधनिर्वाहाय आकाङ्क्षा अवश्यमपेक्षणीया। तथा च तत्तत्संसर्गविशेषविषयकशाब्दबोधं प्रति तत्तत्पदसमभिव्याहारज्ञानस्य कारणतायाः क्लृप्तत्वात् तादृशाकाङ्क्षयैव संसर्गलाभात् अन्यलभ्यत्वेन पदान्तरशक्तिलभ्यत्वानावश्यकत्वात्। अतः अन्यलभ्यत्वलाघवतर्काभ्यां प्रथमगृहीता अन्विते शक्तिः त्यज्यते

अन्वयस्य वाक्यार्थस्यापूर्वत्वात् शाब्दबोधात्पूर्वमुपस्थितिर्नास्ति। पदार्थस्मरणान्तरमेव अन्वयबुद्धिर्ज्जायते। तत्र चाकाङ्क्षादिकं सर्वैः स्वीक्रियते। अतः विनैव वृत्तिं (शक्तिं लक्षणां वा) अन्वयस्य संसर्गस्य आकाङ्क्षया ज्ञानं भवति।

तस्मात् पदानि स्वार्थस्मरणद्वारा अन्वयबोधं जनयन्ति, अन्वयश्च न पदलक्ष्यः, न वा पदशक्यः, अपि तु आकाङ्क्षालभ्यः।

**शाब्दबोधे मुख्यविशेष्यः**

पदैः वृत्त्या स्मृतानां पदार्थानां संसर्गमवगाह्य जायमानः विशेषणविशेष्यभावापन्ननानापदार्थविषयकः बोधः शाब्दबोधः। स एव वाक्यार्थबोधः। अस्मिन् शाब्दबोधे मुख्यविशेष्यतया को भासते इत्यत्र दार्शनिकानां मतभेदो वर्तते।

तत्र मीमांसकाः सर्वत्र आख्यातार्थमुख्यविशेष्यक एव शाब्दबोध इति वदन्ति। वैयाकरणास्तु धात्वर्थमुख्यविशेष्यक एव शाब्दबोध इति कथयन्ति। नैयायिकाः प्रायेण प्रथमान्तार्थमुख्यविशेष्यकः शाब्दबोध इत्यभिप्रयन्ति।

**मीमांसकमतम्**

प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोस्तु प्रत्ययः प्राधान्येन इति व्युत्पत्तिर्वर्तते। द्वितीयाद्यर्थः प्रातिपदिकार्थस्य विशेष्यः, धात्वर्थस्य तिङर्थो विशेष्यः। तिङश्च कालसंख्याकर्तृत्वभावनाः अर्थाः। तत्र भावनायाः प्राधान्यं, भावप्रधानमाख्यातम् इति निरुक्तस्मृतेः। भावना च कृत्यपरपर्याया। भावनायां अपरे आख्यातार्थाः विशेषणतया भासन्ते। भावप्रधानमाख्यातम् इति निरुक्तस्यायमेवार्थः। अत्र भावपदं न धात्वर्थवाचकम्। भूधातोः णिचि तदनन्तरमच्प्रत्यये भावपदो व्युत्पन्नः। भावनानुकूलव्यापाररूपा भावनैव भावपदार्थः। वैयाकरणैरेव भावपदं धात्वर्थे परिभाषितम्। भावप्रधानमाख्यातम् इति निरुक्तस्य भावनातिरिक्ताख्यातार्थं प्रति आख्यातार्थभावनायाः प्राधान्यं वदति।

चैत्रः तण्डुलं पचति इत्यादौ आख्यातेन कर्तृत्वरूपोऽर्थः उक्तः। अभिहिते प्रथमा इति वार्तिकेन चैत्रादिपदोत्तरप्रथमायाः कर्तृत्वमर्थः। सामान्यतया कर्तृत्वमाख्यातेनोच्यते, तस्य च भावनायामन्वयः। आख्यातेनाभिहितं सामान्यतया कर्तृत्वं चैत्रवृत्ति इति ज्ञापयितुं प्रथमायाः कर्तृत्वार्थस्वीकारः। कर्तृत्वञ्चाखण्डो धर्मः, नानुकूलकृतिमत्त्वम्।

सुबर्थप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति विशेष्यतासम्बन्धेन क्रियापदजन्योपस्थितिः कारणमिति कार्यकारणभावः। अतः सुबन्तार्थस्य तिङन्तार्थेऽन्वयः। तिङन्ते च धात्वर्थस्य विशेष्यः आख्यातार्थः, प्रत्ययार्थत्वात्। आख्यातार्थेषु भावनाया एव मुख्यविशेष्यत्वं, निरुक्तवचनात्। अतः सर्वत्र

भावनामुख्यविशेष्यक एव शाब्दबोधः।

चैत्रः ओदनं पचतीत्यत्र चैत्रकर्तृका ओदनवृत्तिकर्मत्वविशिष्टा पाकविशिष्टा वर्तमानकालिका भावनेति बोधः। चैत्रेणोदनः पच्यते इत्यत्र चैत्रवृत्तिकर्तृत्वविशिष्टा ओदनवृत्तिकर्मत्वविशिष्टा, पाकविशिष्टा वर्तमानकालिका भावना इति बोधः। चैत्रेण सुप्यत इत्यत्र भावाख्यातस्थले चैत्रकर्तृका एकत्वविशिष्टस्वापवती स्वापभावनेति बोधः। चैत्रो न पचति इत्यत्र चैत्रकर्तृका पाकभावना अभावप्रतियोगिनी इति, अथवा चैत्रनिष्ठः वर्तमानपाकानुकूलकृत्यभावः इति बोधः। चैत्र एव पचतीत्यत्र चैत्रवृत्तिः चैत्रान्यावृत्तिश्च एककर्तृका पाकभावना इति बोधः। नीलो घट इत्यत्र अस्तीति क्रियापदमध्याहरणीयम्। नीलविशिष्टा घटविशिष्टा च स्थितिभावनेति बोधः। एवं सर्वत्र भावनामुख्यविशेष्यक एव बोधः।

**वैयाकरणमतम्**

सुबन्ततिङन्तचयो वाक्यम्। वाक्ये च आख्यातं प्रधानम्। आख्यातमित्यस्य तिङन्तमित्यर्थः। न तु तिङिति। सुबन्तार्थः तिङन्तार्थे विशेषणम्। तिङन्तजन्यबोधे धात्वर्थो भाव एव विशेष्यः। तिङर्थस्तु धात्वर्थे विशेषणम्।

भावप्रधानमाख्यातम् इति निरुक्तपङ्क्तेः तिङन्ते धात्वर्थस्य प्राधान्यमित्यर्थः। भावशब्दः धात्वर्थवाची, आख्यातशब्दश्च तिङन्तवाची। प्रकृतिप्रत्ययौ सहार्थं ब्रूतः– इति नियमस्तु सुबन्ते एव। तिङन्ते तु प्रकृत्यर्थस्यैव प्राधान्यम्। अतः धात्वर्थमुख्यविशेष्यक एव सर्वत्र बोधः, न भावनामुख्यविशेष्यकः, प्रथमान्तार्थमुख्यविशेष्यको वा। पाकक्रिया भवतीत्यर्थे पचति भवति इति भाष्ये प्रयोगो वर्तते। नात्र प्रथमान्तपदं श्रूयते। यदि प्रथमान्तार्थमुख्यविशेष्यक एव बोधः, तर्हि अस्य प्रयोगस्योत्पत्तिर्न वक्तुं शक्यते। अपि च प्रथमान्तार्थमुख्यविशेष्यकबोधस्वीकारे पश्य मृगो धावतीत्यत्र भाष्यसिद्धैकवाक्यता न स्यात्। मृगकर्तृकधावनकर्मकदर्शनमिति तत्र बोधः। प्रथमान्तार्थमुख्यविशेष्यकबोधस्वीकारे धावनानुकूलकृतिमान् मृगः, दर्शनाश्रयस्त्वम् इति बोधो वक्तव्यः। तथा च वाक्यभेदः। धावनानुकूलकृतिमन्मृगस्य दर्शने कर्मत्वञ्च युज्यते। यदि मृगस्य कर्मत्वं, तर्हि ततः द्वितीया स्यात्। कर्मतासम्बन्धेन मृगस्य दर्शने अन्वयस्वीकारे व्युत्पत्तिविरोधः। नामार्थधात्वर्थयोः भेदसम्बन्धेनान्वयोऽव्युत्पन्नः। अतः निरुक्तकारेण महाभाष्यकारेण च धात्वर्थमुख्यविशेष्यकबोधस्यैव स्वीकृतत्वात् सर्वत्र धात्वर्थमुख्यविशेष्यकबोध एव स्वीकर्तुमुचितः।

चैत्रः तण्डुलं पचतीत्यत्र तण्डुलाभिन्नाश्रयकविक्लृत्त्यनुकूलः एकचैत्राभिन्नाश्रयकः वर्तमानो व्यापारः इति बोधः। चैत्रेण तण्डुलः पच्यत इत्यत्रापि एतादृश एव शाब्दबोधः। चैत्रेण सुप्यते इत्यत्र चैत्राभिन्नाश्रयकः वर्तमानस्वापः इत्यन्वयबोधः। चैत्रो न पचति इत्यत्र चैत्रकर्तृकपाकाभाव इति बोधः।

नवीनवैयाकरणानां मते कर्त्राख्याते व्यापारमुख्यविशेष्यकः कर्माख्याते फलमुख्यविशेष्यकश्च बोधः। चैत्रो न पचतीत्यत्र आरोपिता चैत्रकर्तृकपाकक्रिया इति बोधः। चैत्र एव पचतीत्यत्र अवधारणविषयचैत्रकर्तृकः पाक इति बोधः।

**नैयायिकमतम्**

आख्यातपदरहिताः प्रयोगाः बहुलतया दृश्यन्ते। पण्डितश्चैत्र इत्यादौ पण्डिताभिन्नश्चैत्र इति बोधः। अस्तिर्भवन्तीपरः प्रथमपुरुषः अप्रयुज्यमानोऽप्यस्ति इति कात्यायनवार्तिकमनुसृत्य अस्तीति पदमध्याहर्तव्यमिति वक्तुञ्च युक्तम्, तथापि मध्यमोत्तमयोः तस्य न प्रसक्तेः। सुप्तिङन्तचयो वाक्यम् इत्यस्य सुबन्तचय, तिङन्तचयः, सुप्तिङन्तचयः इति मञ्जूषायां विवरणात् सुबन्तचयस्य वाक्यत्वस्वीकारेण

तत्र तिङ्सामानाधिकरण्याभावात्, चैत्रः पण्डित इत्यादौ प्रथमान्तार्थमुख्यविशेष्यकबोधस्य क्लृप्तत्वात् सति सम्भवे प्रथमान्तार्थमुख्यविशेष्यक एव बोधः स्वीकर्तुमुचितः।

प्रथमाविभक्तेः संख्या एवार्थः। प्रातिपदिकार्थस्य प्रातिपदिकेनैवोक्तत्वात्, पुनः प्रथमायाः तदर्थस्वीकारो नोचितः, अनन्यलभ्यः शब्दार्थ इति न्यायात्। एवं तटः, तटी, तटमित्यादौ लिङ्गस्य बोधो नास्ति। तटान्, तटीः इत्यादौ प्रथमारहितस्थल इव तट इत्यत्रापीति प्रथमाया तत्कल्पने न युक्तिः। एवमेव द्रोणं व्रीहिमानय इत्यत्रेव द्रोणो व्रीहिरित्यत्रापि द्रोणपदस्य द्रोणपरिमिते लक्षणस्वीकारेण प्रयोगः सूपपादः। अतः परिमाणमपि न प्रथमार्थः। अनन्यलभ्या संख्यैव प्रथमार्थः। सा च संख्या प्रकृत्यर्थे साक्षात्सम्बन्धेनान्वेति। चैत्रः इत्यस्य एकत्वविशिष्टश्चैत्र इत्यर्थः। आख्यातस्य कालः, संख्या, कृतिश्चार्थः। कृतिः भावनैव। तदतिरिक्तस्य कर्तृत्वस्य तिङर्थत्वन्नास्ति। भावप्रधानमाख्यातम् इति निरुक्तम् आख्यातार्थेषु कालसंख्याभावनासु भावनायाः प्राधान्यं कथयति। भावना च कर्त्राख्याते कर्तृत्वं (कृतिः) कर्माख्याते कर्मत्वं (फलम्) आश्रयत्वं प्रतियोगित्वमित्यादयः।

प्रथमान्तकर्तृवाचकपदसमभिव्याहारे प्रायः प्रथमान्तार्थमुख्यविशेष्यक एव बोधः। क्वचित् पश्य मृगो धावतीत्यादौ प्रथमान्तार्थस्य आख्यातार्थे विशेषणतया अन्वयः स्वीक्रियते, व्युत्पत्तिवैचित्र्यात्। मृगकर्तृकधावनकृतिकर्मकदर्शनाश्रयपरत्वम् इति बोधः। व्युत्पत्तिवैचित्र्येण प्रथमान्तार्थस्यापि अन्यत्रान्वयः बहुषु स्थलेषु दृश्यते। न हि नैयायिकाः वाक्ये सर्वत्र प्रथमान्तार्थः मुख्यविशेष्यतयैव भासते इति, प्रथमान्तपदासमभिव्याहारे प्रथमान्तपदमध्याहृत्यापि बोधो वक्तव्य इति वा शाठ्यं कुर्वन्ति।

पचति भवति इत्यत्र पाकानुकूलकृतिः भावनाश्रया इति बोधः। चैत्रः तण्डुलं पचतीत्यत्र तण्डुलनिष्ठविक्लत्त्यनुकूलपाकानुकूलकृतिमान् चैत्र इति शाब्दबोधः। चैत्रेण तण्डुलः पच्यत इत्यत्र चैत्रनिष्ठकृतिजन्यव्यापारजन्यविक्लृत्त्याश्रयस्तण्डुल इति बोधः। चैत्रेण सुप्यत इत्यत्र धात्वर्थमुख्यविशेष्यक एव बोधः। चैत्रो न पचति इत्यत्र पाकानुकूलकृत्यभाववान् चैत्र इति बोधः। चैत्र एव पचतीत्यत्र चैत्रः पाकानुकूलकृतिमान् चैत्रान्यः पाकानुकूलकृत्यभाववानिति बोधः।

इत्थञ्च सति सम्भवे प्रथमान्तपदसमभिव्याहारे प्रथमान्तार्थमुख्यविशेष्यकः, क्वचित् निपातार्थमुख्यविशेष्यकः, भावाख्याते धात्वर्थमुख्यविशेष्यकः क्वचित् आख्यातार्थमुख्यविशेष्यकश्च बोधः न सम्भवति।

आकाङ्क्षाज्ञानं, योग्यताज्ञानं, आसत्तिज्ञानञ्च शाब्दबोधे हेतवः। नानार्थकस्थले तात्पर्यज्ञानञ्च।

## References:

१. शा. भा. १.१.२५.